दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लपञ्चमीषष्ठी
भाद्रपद 31 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-08 ■ वर्ष-5 ■ अङ्क-327 | 1 | सितम्बर 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 संस्कृतगीतप्रतियोगितायां सिरमौरस्याधिपत्यम्, अवनीतकौरः प्रथमे स्थाने, अभिनवराणा च द्वितीयं स्थानं प्राप्तवान्

4 उत्तरप्रदेशमन्त्रिमण्डले २३ प्रस्तावाः अनुमोदिताः; मथुरायां २०० कोटिरूप्यकाणां व्ययेन एथेनॉलसंयन्त्रम्, अलीगढनगरे नूतनविश्वविद्यालयस्य स्थापना

8 कृषकेभ्यः सर्वकारीय-योजनानां लाभ-प्रदानम् अस्माकं प्राथमिकता; कृषि-राजस्व-सहकारिता-विभागाः मिलित्वा करिष्यन्ति कार्यम्

## अद्यतनीयं सुभाषितम्

**आत्मकार्यं महाकार्यं परकार्यं न केवलम्।**
**आत्मकार्यस्य दोषेण कूपे पतति मानवः।।**

भावार्थः- केवल अन्य व्यक्तियों के कार्यों को संपादित करना ही महान कार्य नहीं होता है, अपना स्वयं का कार्य करना भी उतना ही महत्त्वपूर्ण होता है, क्योंकि अपने स्वयं के कार्य में कोई दोष होने पर एक कुएं में गिरने के समान मनुष्य का पतन हो जाता है।




# खातिप्रदेशे वाणिज्यिक-पोतानां, सामुद्रिकयात्रिणां, नागरिकाणां तथा नागरिकमूलसंरचनायाः लक्ष्यीकरणम् भारताय अस्वीकार्यम् - विदेशमन्त्रालयः



नवदेहल्याम् आयोजितस्य अष्टादशतमस्य ब्रिक्स-शिखरसम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदिना चीनदेशस्य राष्ट्रपतिना सह वार्तालापः कृतः इति विदेशमन्त्रालयेन संसूचितम्। नवदेहल्यां साप्ताहिक-वार्ताहर-सम्मेलनस्य समये, मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत्, तयोः वार्तालापस्य समये, प्रधानमन्त्री सबलं प्रतिपादितवान् यत् उभौ पक्षौ परस्परं मूलचिन्ताविषये संवेदनशीलतां दर्शयितव्यम्। ओमानस्य तटसमीपे वाणिज्यिक-पोतस्य एम्.टी. एल्. गैया इत्यस्य उपरि कृते आक्रमणसम्बन्धी प्रश्नस्य उत्तरं ददन् श्रीजायसवालः उक्तवान् यत् अस्मिन् प्रदेशे वाणिज्यिक पोतानां, समुद्रीयकर्मकराणां, नागरिकाणां तथा नागरिकमूलसंरचनायाः लक्ष्यीकरणं भारताय अस्वीकार्यं अस्ति। पाकिस्तानद्वारा जैश-ए-मोहम्मद-सङ्घटनस्य प्रमुखाय मसूद अज़हर् इत्यस्मै पाकिस्तानस्य सप्ततिलक्ष-रूप्यकाणां पारितोषिकस्य घोषणासम्बन्धी प्रश्नस्य उत्तरं ददन् विदेशमन्त्रालयस्य प्रवक्ता रणधीरजायसवालः उक्तवान् यत् पाकिस्तानस्य एतादृशानि कौशलानि, जनवञ्चनायाश्च प्रयत्नाः नूतनाः न सन्ति। भारतं पूर्वमपि एतादृशान् प्रयत्नान् दृष्टवान् अस्ति। श्रीजायसवालः उक्तवान् यत् पाकिस्तानं केवलं घोषणाः न कृत्वा दृढकार्याणि कुर्यात्, यतः एतादृश्यः घोषणाः अन्ततः निष्फलाः एव भवन्ति।

# रक्षामन्त्री राजनाथसिंहः रक्षाक्षेत्रे आत्मनिर्भरतां प्राप्तुं सशस्त्रबलानां, रक्षानुसन्धान-विकास-सङ्घटन-संस्थायाः तथा उद्योगजगतः मध्ये अधिकसहकारस्य आह्वानं कृतवान्




हिमसंस्कृतवार्ता नवदेहली। रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् भारतं रक्षाक्षेत्रे आयातेषु आश्रितं न भवेत्, अपितु आत्मनिर्भरतादिशि अग्रे गच्छेत् इति सुनिश्चेतुं प्रशासनेन विविधाः उपायाः कृताः सन्ति। सः बलं दत्तवान् यत् रक्षाबलानां, अनुसन्धान-विकास-संस्थानां तथा उद्योगजगतः मध्ये निर्बाधसहकारेण आत्मनिर्भरता प्राप्तुं शक्यते। असौ प्रौद्योगिकीं शीघ्रस्वीकरणाय तथा भारतस्य रक्षानिर्माण-पारिस्थितिकी तन्त्रस्य सुदृढीकरणाय अधिकसंवादस्य, सह-विकासस्य सह-उत्पादनस्य च आवश्यकतायां बलं दत्तवान्। नवदेहल्याम् ऐषमः रक्षानुसन्धान-विकास-सङ्घटन-उद्योग समन्वय-उपवेशनं, 'विमर्श' इत्येतं सम्बोधयन् श्रीसिंहः उक्तवान् यत् रक्षानुसन्धान-विकास-सङ्घटन-संस्थया युद्धविमानेभ्यः आरभ्य पनडुब्बीपर्यन्तं अथ कृत्रिमबुद्धिमत्तापर्यन्तं च विविधेषु क्षेत्रेषु स्वकीयाः क्षमताः प्रदर्शिताः सन्ति। रक्षामन्त्री उक्तवान् यत् विगतेषु कतिपयेषु वर्षेषु रक्षाक्षेत्रे कृताः परिष्काराः अभूतपूर्वाः सन्ति तथा अनेके महत्त्वपूर्णाः निर्णयाः स्वीकृताः, येन अस्मिन् क्षेत्रे व्यापकपरिवर्तनं जातम्।

### देशे वृत्तिहीनतायाः स्थितौ परिष्कारः...

देशे पञ्चदशवर्षीयवयस्कानां ततोऽधिकानाञ्च जनानां समग्रकार्यबलसहभागितादरः – डब्ल्यूपीआर अगस्तमासे वर्धित्वा ५२.८ प्रतिशतम् अभवत्, यः मार्च २०२६ तः सर्वोच्चः स्तरः अस्ति। सांख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयस्य मासिकश्रमबल-वृतिहीनतायाः प्रदत्तानामनुसारं ग्रामीणडब्ल्यूपीआर-क्षेत्रे १.३ प्रतिशतस्य वृद्धिः अभवत् तथा च तत् ५५.८ प्रतिशतं प्राप्तवान्। शहरीडब्ल्यूपीआर-क्षेत्रे अर्द्धप्रतिशतस्य पतनं दर्जं जातम् तथा च तत् अगस्तमासे ४७ प्रतिशतम् आसीत्।

# उत्तरप्रदेश-उत्तराखण्ड-हिमाचलप्रदेश-हरियाणा-राजस्थान-दिल्ली मुख्यमन्त्रिभिः यमुनानद्याः पुनरुद्धाराय किशाऊ-बहुउद्देशीय-बन्ध-परियोजना-सम्बद्धे सन्धौ हस्ताक्षराणि कृतानि



उत्तरप्रदेश-उत्तराखण्ड-हिमाचलप्रदेश-हरियाणा-राजस्थान-दिल्ली चेत्येतेषां नगराणां मुख्य-मन्त्रिभिः यमुनानद्याः पुनरुद्धाराय किशाऊ-बहु-उद्देशीय-बन्धपरियोजनासम्बद्धे सन्धौ हस्ताक्षराणि कृतानि। नवदेहल्यां केन्द्रीयगृहमन्त्रिणः अमितशाहस्य उपस्थितौ अस्मिन् सन्धौ हस्ताक्षराणि जातानि । अस्मिन् अवसरे केन्द्रीय-जलशक्तिमन्त्री सी.आर्.पाटिलः, केन्द्रीय-गृहसचिवः, केन्द्रीयजलसंसाधनसचिवः तथा सम्बद्धराज्यानां मुख्यसचिवाश्च उपस्थिताः आसन्। अस्य वर्षस्य जूनमासे केन्द्रीयगृहमन्त्री एतेषां राज्यानां मुख्यमन्त्रिभिः सह अस्मिन् विषये उपवेशनस्य अध्यक्षतां कृतवान्। तस्मिन् उपवेशने निर्णीतं यत् किशाऊ-बहु-उद्देशीय-बन्धपरियोजनायाः जलघटकस्य व्ययस्य नवतिप्रतिशतं केन्द्रप्रशासनं केन्द्रीयसहायतारूपेण निर्वक्ष्यति, अवशिष्टं दशप्रतिशतं वित्तीयभारं षड्भिः सहभागि राज्यैः विभज्य वहिष्यते।

# संस्कृतगीतप्रतियोगितायां सिरमौरस्याधिपत्यम्,

## अवनीतकौरः प्रथमे स्थाने, अभिनवराणा च द्वितीयं स्थानं प्राप्तवान्







**हिमसंस्कृतवार्ता** डॉ.अमनदीप शर्मा (प्रधानसंपादकः)। हिमसंस्कृतम् न्यासस्य तत्त्वाधाने 'हिमसंस्कृतवार्ता' इत्यस्य फेसबुकपुटे संस्कृतसप्ताहस्य उपलक्ष्ये एका अखिलभारतीया भव्यसंस्कृतगीतगायनप्रतियोगिता आयोजिता आसीत्, या दिनाङ्कः २७ अगस्ततः ०७ सितम्बर २०२६ पर्यन्तम् सम्पन्ना। अस्याः प्रतियोगितायाः परिणामः ऋषि पञ्चमी दिने हिमसंस्कृतवार्तायाः फेसबुकपटले उद्घोषितः।

ऋषिपञ्चम्या अवसरे आयोजिते अस्मिन् कार्यक्रमे वर्तमानसंस्कृतयुगस्य ऋषिकल्पः श्रीमान प्रतापसिंहः सर्वान् स्वाशीर्वचनैः उपकृतवान्। तेन स्वीये सम्बोधने उक्तं यत् अस्माभिः योनूचानः सः नो महानः अर्थात् "यः मनुष्यः सम्यक् अध्ययनं कृतवान् अस्ति, शास्त्रज्ञः ज्ञानवान् वा अस्ति, सः एव अस्माकं मध्ये महान् (श्रेष्ठः पूज्यश्च) अस्ति, अतः अस्माभिः सर्वैः शास्त्राध्ययनं करणीयम्। तेन प्रतिपादितं यत् देशे बहुवर्षेभ्यः संस्कृतक्षेत्रे पुरातनज्ञानविषये सर्वदा जनाः चिन्तिता आसन्, परञ्च वर्तमान युगे संस्कृतज्ञानां दृष्टौ परिवर्तनं जातम्, येन ते भविष्यस्य कल्पनायामपि कटिबद्धाः दृश्यन्ते। केन्द्रीयसंस्कृत-विश्वविद्यालयस्य नूतनानां पाठ्यक्रमाणां प्रशंसां कुर्वन् तेनोक्तं यत् वर्तमानयुगे संस्कृतक्षेत्रे अवसरः अस्ति, यत् कृत्रिमबुद्धिमत्तायाः क्षेत्रे संस्कृतस्य महनीयं कार्यं भवेत्। संस्कृते नवाचाराणां नूतनदृष्टेः उदाहरणं यच्छन् तेनोक्तं यत् हिमसंस्कृतवार्ता अपि भविष्यस्य चिन्तनेन संस्कृतक्षेत्रे उत्तमरीत्या कार्यं करोति। कार्यक्रमे निर्णायकेषु मनोज कुमारः, डॉ.अमितकुमारः, शिवाशर्मा च प्रतिभागिनाम् उत्साहवर्धनाय प्रेरितवन्तः। तत्रैव डॉ.मनोजशैलः सर्वेषाम् स्वागतं विहितवान्। कार्यक्रमस्यान्ते डॉ.अमितशर्मणा प्रतियोगितायाः परिणामस्य घोषणा कृता।

### प्रतियोगितायाः परिणामस्य विवरणम्

**प्रथमस्थानम्:** अवनीत कौर (कक्षा - दशमी, राजकीय वरिष्ठ माध्यमिक विद्यालय भगानी, जिला सिरमौर, हि०प्र०)

**द्वितीयस्थानम्:** अभिनव राणा (कक्षा - दशमी, राजकीय उच्च विद्यालय धार, जिला सिरमौर, हि०प्र०)

**तृतीयस्थानम्:** समृद्धि कपूर चौहान (कक्षा - सप्तमी, राजकीय वरिष्ठ माध्यमिक विद्यालय कोडगा, जिला सिरमौर, हि०प्र०)

अनेन क्रमे एकलव्य आदर्श आवासीय विद्यालय कोंटा, जिला सुकमा (छत्तीसगढ़) इत्यस्य दशमी कक्षायाः बालिकायैः करको लक्ष्मी इत्यस्यै प्रोत्साहनपुरस्कारः प्रदत्तः। ध्यातव्यं यत् हिमसंस्कृतम् न्यासस्यास्यां प्रतियोगितायां प्रथम, द्वितीयं, तृतीयं च स्थानं प्राप्तवन्तः छात्राः २१००, ११००,७०० रूप्यकाणां पारितोषिकेन सम्मानिताः भविष्यन्ति। हिमसंस्कृतम् न्यासपरिवारस्य पक्षतः सर्वेभ्यः विजेतृप्रतिभागिभ्यः उज्ज्वलविभविष्यस्य शुभकामनाः च प्रदीयन्ते।

# मुख्यमन्त्री सुक्खू-महोदयः अवदत्- हिमाचलेन स्वहितानि सुरक्षितानि कृतानि; द्विसहस्र- कोटि- रूप्यकाणां भारः लाभार्थी-राज्येषु निक्षिप्तः

**हिमसंस्कृतवार्ताः- नवदेहली।** किशाऊ-बहुउद्देश्यीय-परियोजनायाः परिकल्पनं मूर्तरूपं प्रदातुं मङ्गलवासरे नवदेहल्यां हिमाचलप्रदेशः, हरियाणा, उत्तराखण्डम्, उत्तरप्रदेशः, देहली, राजस्थानं चेति षड्भिः राज्यैः अस्याः परियोजनायाः क्रियान्वयनाय सहमतिपत्रे हस्ताक्षराणि कृतानि। उत्तराखण्ड-हिमाचलप्रदेशयोः सीमायां प्रवहन्त्यां टोन्स-नद्यां १५,६२४ कोटि-रूप्यकाणाम् अनुमानित-व्ययेन अस्याः परियोजनायाः निर्माणं विधास्यते। केन्द्रीय-गृहमन्त्रिणः अमितशाह-महोदयस्य उपस्थितावेव अस्मिन् सहमतिपत्रे हस्ताक्षराणि सम्पादितानि। सहमतिपत्रे केन्द्रीय- जलशक्ति-मन्त्रिणा सी. आर. पाटिलमहोदयेन, हिमाचलप्रदेशस्य मुख्यमन्त्रिणा सुखविन्दर-सिंहसुक्खू- महोदयेन, हरियाणा- मुख्यमन्त्रिणा नायबसिंहसैनी-महोदयेन, उत्तराखण्ड-मुख्यमन्त्रिणा पुष्करसिंहधामी- महोदयेन, उत्तरप्रदेश-मुख्यमन्त्रिणा योगी- आदित्यनाथ-महोदयेन, देहल्याः मुख्यमन्त्रिण्या रेखागुप्ता-महोदयया, राजस्थान-मुख्यमन्त्रिणा भजनलाल-शर्मा-महोदयेन च हस्ताक्षराणि विहितानि।

### केन्द्रस्य समक्षं दृढतया उत्थापितः आसीत् विषयः- मुख्यमन्त्री

मुख्यमन्त्री वार्ता-माध्यमानां प्रतिनिधिभिः सह सम्भाषणे अवदत् यत् केन्द्रीय-गृह-मन्त्रिणः अध्यक्षत्वे १६ जून २०२६ दिनाङ्के सम्पन्नायाम् उच्चस्तरीय-गोष्ठ्याम् अस्याः परियोजनायाः विद्युत्-घटके हिमाचलप्रदेशस्य पक्षतः आपतमानायाः प्रायः द्विसहस्र-कोटि-रूप्यकाणाम् (२००० कोटि) अनुमानित-व्ययराशेः वहनं जलघटकात् लाभान्वितैः देहली- राजस्थान- हरियाणा- राज्यैः क्रियेत इति विषये केन्द्र-सर्वकारेण सैद्धान्तिकसहमतिः प्रकटिता आसीत्। सः अवदत् यत् हिमाचलप्रदेश- सर्वकारेण राज्यम् अस्मात् अतिरिक्त- वित्तीय- भारात् रक्षितुं केन्द्रसर्वकारस्य पुरतः दृढतया अयम् अंशः उत्थापितः आसीत्।



### राज्यहितेभ्यः प्राथम्यं दत्त्वा ८०० कोटि- रूप्यकाणां प्रस्तावः अस्वीकृतः

मुख्यमन्त्रिणा स्पष्टीकृतं यत् पूर्वतन-सर्वकारेण राज्यस्य पक्षतः ८०० कोटि-रूप्यकाणां वित्तीय-सहभागितायै सम्मतिः दत्ता आसीत्, किन्तु वर्तमानसर्वकारेण प्रदेशस्य सीमित- वित्तीय-संसाधनानि मनसि निधाय, राज्य-हितेभ्यः प्राथम्यं दत्त्वा अयं प्रस्तावः निरस्तः कृतः आसीत्। सः अग्रे प्रोक्तवान् यत् प्रदेशसर्वकारेण प्रमुखतया अयं पक्षः पुरतः स्थापितः यत् परियोजनायाः जलघटकाय केन्द्रसर्वकारः ९० प्रतिशतं यावत् अनुदानं प्रयच्छति, तर्हि एतादृश्याम् अवस्थायां विद्युत्- घटकाय एतादृश्याः सहायतायाः अप्रदानम् अनुचितं वर्तते।

# बिहारराज्यमहिलायोगस्य रजत-जयन्तीसमारोहस्य आयोजनं भविष्यति



**पाटलिपुत्रम्, १५सितम्बर२०२६।**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**

बिहारराज्य-महिलायोगः स्वस्थापनायाः २५ वर्षाणि पूर्णानि कृत्वा रजतजयन्तीसमारोहस्य आयोजनं करिष्यति। अस्मिन् अवसरे बापूसभागारे भव्यः कार्यक्रमः आयोजयिष्यते। कार्यक्रमस्य उद्घाटनं बिहारस्य मुख्यमन्त्री सम्राटचौधरी करिष्यति। अस्मिन् समारोहे मुख्यमन्त्रिणा सह द्वौ उपमुख्यमन्त्रिणौ, अनेके मन्त्रिणः, महिलायोगस्य वर्तमानाः तथा पूर्वाध्यक्षाः सदस्याश्च आमन्त्रिताः सन्ति। कार्यक्रमे बिहारराज्यमहिलायोगः स्वडाकचिटिकां प्रकाशितं करिष्यति। महिलायोगस्य सदस्या सजल झा उक्तवती यत् महिलायोगस्य रजतजयन्त्याः अवसरे आयोगस्य नाम्ना डाकचिटिका प्रकाशितं करिष्यते। आयोगेन निर्गतेषु पत्रेषु, सूचनासु च एतत् डाकचिटिका प्रयुज्यते। सजलझा उक्तवती— “वयं इच्छामः यत् आयोगस्य सर्वे पूर्वाध्यक्षाः अस्याः यात्रायाः साक्षिणः भवन्तु, येषां योगदानेन महिलायोगः अद्यतनं स्वरूपं प्राप्तवान्।” तया सह महिला-विधायकाः, महिला-संसत्सदस्याः, विभिन्नेषु क्षेत्रेषु कार्यं कुर्वत्यः महिलाः च समारोहाय आमन्त्रिताः सन्ति। समारोहस्य अवसरे बिहारराज्य-महिलायोगस्य विगत २५ वर्षाणां यात्रायाः वृत्तचित्रस्य प्रदर्शनम् अपि भविष्यति। अस्मिन् वृत्तचित्रे आयोगेन अद्यावधि सम्पादितानां कार्याणां, प्रकरणानां च विस्तृतः विवरणः प्रदर्शयिष्यते। तत्र महिलानां पुनर्वासः, तासां गृहनिर्माणे साहाय्यम्, कठिनपरिस्थितीनां सम्मुखीभवन्तीनां महिलानां कृते आयोगेन कृताः प्रयासाः, विभिन्नस्थानेषु आयोजिताः महिला-शिबिराणि,पीडितानां महिलानां कृते प्रदत्तं परामर्शं तथा साहाय्यं च प्रदर्शयिष्यते। आयोगस्य सदस्यायाः अनुसारं, अनेकेषां महिलानां जीवनपरिवर्तने आयोगस्य महत्त्वपूर्णं योगदानम् अस्ति। एतादृशानां सफलप्रयासानां विवरणं वृत्तचित्रे दर्शयिष्यते। समारोहस्य अन्तर्गतम् साइबर-अपराधसम्बद्धः जागरूकताकार्यक्रमः अपि आयोजयिष्यते। अनेन माध्यमेन महिलाः साइबर-अपराधेभ्यः कथं सुरक्षिताः भवेयुः, स्वव्यक्तिगतसूचनानां तथा वित्तीयविवरणानां संरक्षणं कथं कुर्युः इत्यादिविषयेषु जागरूकतायाः कृते चर्चा भविष्यति। रजतजयन्तीसमारोहेन महिलानां अधिकारसंरक्षणाय, सशक्तीकरणाय, सम्मानाय च बिहारराज्यमहिलायोगस्य प्रतिबद्धता पुनः प्रकाशितः भविष्यति।

# डब्ल्यू.सी.ई.एफ्. इति विश्वचक्रीय-अर्थव्यवस्था-मञ्चस्य दशमसंस्करणस्य उद्घाटनसत्रं सम्बोधितवान् भूपेन्द्रयादवः




पर्यावरण-वन-जलवायुपरिवर्तनमन्त्री भूपेन्द्रयादवः उक्तवान् यत् भारतं स्वस्य सततविकासस्य संरचनायां चक्रीय-अर्थव्यवस्थायाः सिद्धान्तान् समावेशयितुं प्रतिबद्धम् अस्ति। मन्त्रिणा उक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भारतेन पुनरुपयोगस्य, जीर्णोद्धारस्य संरक्षणस्य च स्वकीयाः प्राचीनसांस्कृतिकमूल्याः समकालिकनीतिषु समावेशिताः। गान्धीनगरस्य महात्ममन्दिरे आयोजितस्य ऐषमः डब्ल्यू.सी.ई.एफ्. इति विश्वचक्रीय-अर्थव्यवस्था-मञ्चस्य दशम-संस्करणस्य उद्घाटनसत्रं सम्बोधयन् मन्त्रिणा प्रतिपादितम् यत् ई.पी.आर्. इति विस्तारित-उत्पादक-उत्तरदायित्व-नियमाः तथा मिशन लाइफ़ सदृशाः उपक्रमाः चक्रीयार्थव्यवस्थायाः सुदृढीकरणाय महत्त्वपूर्णाः प्रयत्नाः सन्ति। ब्रिक्स्-नवदिल्लीघोषणा, भारत-यूरोपीयसङ्घसंयुक्तरूपरेखा, मिशन् लाइफ् सदृशानां विविधा-वैश्विक-सहयोगोपक्रमाणाम् उल्लेखं कुर्वता मन्त्रिणा उक्तं यत् पुनः प्रयोगव्यवस्थायाः प्रारम्भः गृहेभ्यः एव भवितव्यः। गुजरातस्य मुख्यमन्त्री भूपेन्द्रपटेलः अस्य मञ्चस्य उद्घाटनं कृतवान्। भारते प्रथमवारम् अस्य मञ्चस्य आयोजनं भवति।

# बिहारस्य नगरीयविकासाय सीईपीटी-संस्थया सह तांत्रिक-सहमतिः, 'ग्रीनफील्ड टाउनशिप' इत्यस्य मार्गः प्रशस्तः

## आधुनिकनियोजनेन संवरिष्यते राज्यस्य भविष्यम्- नगरविकासमन्त्री नीतीशमिश्रः




**हिमसंस्कृतवार्ताः राघवनाथ झा, पाटलिपुत्रम् (पटना)।** बिहारे सुयोजितस्य, आधुनिकस्य, भविष्यस्य च आवश्यकतानाम् अनुरूपं नगरीयविकासं नवां दिशां प्रदातुं कृतेन प्रयासेन मङ्गलवासरे नगरविकास एवम् आवासविभागस्य, सेण्टर फॉर एन्वायरन्मेण्ट प्लैनिङ्ग एण्ड टेक्नोलॉजी एडवाइजरी फाउण्डेशन (सीईपीटी एडवाइजरी फाउण्डेशन), अहमदाबाद इत्यस्य च मध्ये तांत्रिक-सहायता-घटकस्य (टीएसयू) संस्थापनाय महत्त्वपूर्णे संविदा-पत्रे (एमओयू) हस्ताक्षरं कृतम्। अस्मिन् अवसरे नगरविकास एवम् आवासमन्त्री नीतीशमिश्रवर्यः, विभागस्य प्रधानसचिवः विनयकुमारवर्यश्च उपस्थितावास्ताम्। अस्मिन् संविदापत्रे नगरविकास एवम् आवास-विभागस्य विशेषसचिव- सह- मुख्यकार्यकारी-अधिकारी, बिहार- नगर- विकास-प्राधिकरणस्य नवलकिशोरचौधरी, सीईपीटी एडवाइजरी फाउण्डेशन इत्यस्य निदेशकः दर्शनपारिखः हस्ताक्षरम् अकुरुताम्। मन्त्री नीतीशमिश्रवर्यः अकथयत् यत् अनेन तांत्रिक-सहयोगेन बिहारे प्रस्तावितानां ‘ग्रीनफील्ड सैटेलाइट टाउनशिप’ इत्येतेषां सुयोजिताय शाश्वत-विकासाय च महती गतिः प्राप्स्यते। सीईपीटी एडवाइजरी फाउण्डेशन द्वारा आधुनिक-नगरीय- योजनस्य, स्थानिकविकासस्य, नीतिनिर्माणस्य, भू-उपयोग-नियोजनस्य, आधारभूत- संरचना-विकासस्य, दीर्घकालिक- नगरीय- विकासस्य च रणनीतेः निर्माणे प्राविधिक- विशेषज्ञता प्रदास्यते। सः न्यवेदयत् यत् माननीयाना मुख्यमन्त्रिणां सम्राट चौधरी महाभागानां विकसित-समृद्ध-बिहारस्य संकल्पनाम् अनुसृत्य राज्ये भाविनः आवश्यकताः अवलोक्य नूतनानाम् आधुनिकानां च नगरीयक्षेत्राणां विकासाय कार्यं क्रियते। सीईपीटी एडवाइजरी फाउण्डेशन सदृश्या प्रतिष्ठित- तांत्रिक- संस्थया सह कृतः एषः सहयोगः बिहारे सुयोजित- स्थिर- भविष्योन्मुख-नगरीयविकासाय महत्त्वपूर्णं सोपानं सिद्धं भविष्यति। तेन उक्तं यत् तांत्रिक-सहायता-घटकः (टीएसयू) विभागाय तथ्याधारित- वैज्ञानिक-आधुनिक- नगरीय-नियोजनाय आवश्यकं तांत्रिक-सहयोगं प्रदास्यति। अनेन माध्यमेन प्रस्ताविताः ‘ग्रीनफील्ड सैटेलाइट टाउनशिप’ उत्तमेन संसर्गेण (कनेक्टिविटी), आधुनिक-आधारभूत-संरचनया, पर्यावरण-स्थिरतया नागरिक-केन्द्रित-सुविधाभिः च युक्ताः भविष्यन्ति।एषः प्राविधिकः सहयोगः बिहारे आगामि- नगरीय- आवश्यकतानां दृष्ट्या उत्तम-नियोजनस्य, संसाधनानां समुचित-उपयोगस्य, गुणवत्तापूर्ण- नगरीय- संरचना-विकासस्य च दिशि दृढम् आधारं रचयिष्यति।

# कालका-शिमला-रेलमार्गे ३० सितम्बर-दिनाङ्कं यावत् बहूनि रेलयानानि निरस्तानि; द्वयोः सञ्चालनं सीमितम्



**हिमसंस्कृतवार्ताः- शिमला।**

विश्व-धरोहररूपेण विख्याते कालका- शिमला- रेलमार्गे प्रवासं कुर्वतां यात्रिकाणां काठिन्यम् एकवारं पुनः संवर्धितम्। रेलवे-मण्डलेन १६ सितम्बरतः ३० सितम्बर २०२६ पर्यन्तं कानिचन लघु- गेज- रेलयानानि निरस्तीकर्तुं निर्णयः स्वीकृतः। अनेन सह द्वयोः रेलयानयोः सञ्चालनम् अपि सीमितं विहितम्। एतद् परिवर्तनं ५७-सङ्ख्यकस्य सेतोः समीपे रेलमार्गस्य पार्श्वे मृत्तिकायाः स्खलनेन संजातायाः क्षतेः पुनर्निर्माणकार्यार्थं कृतः।

अम्बाला-रेलवे-मण्डलस्य अधिसूचनानुसारं ५७-सङ्ख्यकसेतोः समीपे मृत्तिका-प्रवाहेण रेलमार्गः दुष्प्रभावितः अभवत्। अस्य मार्गस्य संस्कार-कार्यं त्वरित-गत्या प्रचलति। अतः १६ सितम्बरतः ३० सितम्बर-पर्यन्तं यान-सञ्चालने एतद् परिवर्तनं कृतम्। 'अप' दिशि गच्छन्ति ५२४५७, ५२४५१, ५२४५९ तथा ५२४५५ सङ्ख्यकानि रेलयानानि अस्यां कालावधौ निरस्तानि स्थास्यन्ति। अस्मात् अतिरिच्य 'अप-मिश्रित-यानस्य' सञ्चालनम् अपि स्थगितं भविष्यति। अधः दिशि ५२४५८, ५२४५२, ५२४६०, ५२४५६ सङ्ख्यकानि च रेलयानानि अपि १६ तः ३० सितम्बर-पर्यन्तं न चलिष्यन्ति। तथैव 'डाउन-मिश्रित-यानम्' (कालका-शिमला) अपि निरस्तं कृतम्।

**आंशिक-रूपेण सञ्चाल्यमानानि रेलयानानि**

रेल-प्रशासनेन ५२४५३-सङ्ख्यकस्य रेलयानस्य सञ्चालने अपि परिवर्तनं विहितम्। इदं यानं १६ तः ३० सितम्बरपर्यन्तं केवलं धर्मपुरस्थानात् प्रवर्तिष्यते, अर्थात् कालका-धर्मपुरयोः मध्ये अस्य सञ्चालनं निरस्तं स्थास्यति। तथैव ५२४५४-सङ्ख्यकं यानं शिमलातः धर्मपुर-पर्यन्तम् एव चलिष्यति, धर्मपुर-कालकयोः मध्ये अस्य यात्रा स्थगिता भविष्यति। यात्रिकेभ्यः एतेषां परिवर्तनानां विषये ध्यानं दातुं परामर्शः दत्तः।

**संस्कार-कार्यं प्रचलति-**

रेलयानाधिकारिणां मतेन ५७-सङ्ख्यक-सेतोः समीपे रेलमार्गस्य पुनर्निर्माण-कार्यं निरन्तरं जायमानम् अस्ति। अस्य कार्यस्य समाप्तेः अनन्तरमेव रेलमार्गे यानानां सामान्य-सञ्चालनं प्रारप्स्यते। ३० सितम्बरदिनाङ्कं यावत् रेलयात्रायाः योजनां कुर्वद्भिः यात्रिकैः यात्रा-प्रारम्भात् पूर्वं रेलयानानां स्थितेः सूचना स्वीकरणीया, येन प्रवासे असुविधा न भवेत्।




# उत्तरप्रदेशमन्त्रिमण्डले २३ प्रस्तावाः अनुमोदिताः; मथुरायां २०० कोटिरूप्यकाणां व्ययेन एथेनॉलसंयन्त्रम्, अलीगढनगरे नूतनविश्वविद्यालयस्य स्थापना

**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, लखनऊ**

उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथस्य अध्यक्षतायां सम्पन्नायां प्रदेश-मन्त्रिमण्डलस्य सभायां २३ महत्त्वपूर्णाः प्रस्तावाः अनुमोदिताः। मन्त्रिमण्डलेन स्वीकृतेषु प्रस्तावेषु मथुराजनपदस्य छाताक्षेत्रे एथेनॉलसंयन्त्रस्य स्थापना, अलीगढनगरे नूतनविश्वविद्यालयस्य स्थापना, गृहभाटक-प्रक्रियायाः सरलीकरणं तथा परिवहनविभागसम्बद्धाः कतिपयाः प्रस्तावाः प्रमुखाः सन्ति। मन्त्रिमण्डलस्य एते निर्णयाः प्रदेशस्य औद्योगिकविकासं, उच्चशिक्षायाः विस्तारं, रोजगारस्य सृजनं, प्रशासनिक-प्रक्रियाणां सरलीकरणं च दृष्ट्वा महत्त्वपूर्णाः मन्यन्ते।

मथुराजनपदस्य छाताक्षेत्रे प्रायः २०० कोटिरूप्यकाणां व्ययेन एथेनॉल-संयन्त्रं स्थापयितुं मन्त्रिमण्डलेन अनुमतिः प्रदत्ता। अस्मिन् संयन्त्रे केवलम् इक्षोः एव उपयोगः न भविष्यति, अपि तु मक्का-धान्ययोः अपि उपयोगेन एथेनॉल इत्यस्य उत्पादनं भविष्यति। प्रस्तावितस्य संयन्त्रस्य वार्षिक-उत्पादनक्षमता प्रायः ३.९६ कोटिलीटर भविष्यति। एतत् संयन्त्रं विस्तारपरियोजनायाः अन्तर्गतं विकसितं भविष्यति तथा वर्षे प्रायः एकादशमासान् यावत् संचालितं भविष्यति। छाताक्षेत्रे प्रायः १९ वर्षपूर्वं शर्करायन्त्रालयस्य संचालनं स्थगितम् अभवत्। यन्त्रालयस्य संचालनाय प्रतिवर्षं प्रायः ५० लक्ष-क्विण्टल इक्षोः आवश्यकता आसीत्। इक्षोः मूल्यस्य भुगतानसम्बद्धानां समस्याणां कारणेन यन्त्रालयस्य संचालनं स्थगितमिति ज्ञायते।

अधुना तस्मिन् क्षेत्रे एथेनॉलसंयन्त्रस्य स्थापनया पुनः औद्योगिकगतिवर्धनस्य सम्भावना वर्धिता अस्ति। एषा परियोजना स्थानीय-अर्थव्यवस्थायाः सुदृढीकरणे महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नोति। प्रस्तावित- परियोजनायै प्रायः ९६ एकडपरिमिता भूमिः उपलब्धा अस्ति। छाताक्षेत्रं राष्ट्रियराजमार्गस्य समीपे स्थितम् अस्ति। नोएडाविमानपत्तनस्य समीपकारणात् अस्य क्षेत्रस्य सम्पर्कव्यवस्था अपि सुदृढा अस्ति।

एथेनॉलसंयन्त्रेण सह भाण्डारगृहाणि तथा अन्याः आवश्यक्यः आधारभूतसुविधाः अपि विकसिताः भविष्यन्ति। अस्याः परियोजनायाः माध्यमेन क्षेत्रे सहस्रशः जनानां कृते प्रत्यक्षं परोक्षं च जीविकोपार्जनं प्राप्तुं अवसराः प्राप्स्यन्ति इति शासनस्य अपेक्षा अस्ति।शासनस्य योजनानुसारं भविष्ये यदि अस्मिन् क्षेत्रे इक्षोः पर्याप्ता उपलब्धता भवति, तर्हि अत्र पुनः शर्करायन्त्रालयस्य स्थापनायाः सम्भावनाः अपि भवितुं शक्यते। तेन सह ऊर्जा-उत्पादन-संयन्त्रस्य स्थापनायाः सम्भावनाः अपि अन्विष्यन्ते।अतः एथेनॉलपरियोजना केवलम् एकस्य संयन्त्रस्य स्थापनायै सीमिता न भविष्यति, अपि तु दीर्घकालिकदृष्ट्या अस्य क्षेत्रस्य विस्तृत-औद्योगिकपरिसररूपेण विकासस्य सम्भावना वर्तते।

मन्त्रिमण्डलेन अलीगढजनपदे साई ग्लोबल विश्वविद्यालयस्य स्थापनायै अपि अनुमतिः प्रदत्ता। सम्बन्धितमन्त्रिणा श्रीयोगेन्द्र उपाध्यायेन उक्तं यत् 'ओम् साई' संस्थायै विश्वविद्यालयस्य स्थापनार्थम् आशयपत्रं निर्गतम् अस्ति। आवश्यकमानकानां पूर्त्यनन्तरं विश्वविद्यालयस्य स्थापनायै अनुमति प्रदत्ता अस्ति। आगामीत्रिषु वर्षेषु विश्वविद्यालयस्य शैक्षणिककार्यक्रमाणां प्रारम्भः भवेत् इति अपेक्षा अस्ति। विश्वविद्यालयस्य स्थापनया अलीगढनगरे तथा तस्य समीपवर्तीक्षेत्रेषु उच्चशिक्षायाः अवसराः लप्स्यन्ते। विद्यार्थिभ्यः विविधेषु विषयेषु उच्चशिक्षां प्राप्तुं नूतनाः अवसराः प्राप्स्यन्ति। शिक्षाक्षेत्रे अपि जीविकोपार्जनस्य अवसराः सृज्येरन् इति अपेक्षा अस्ति। मन्त्रिमण्डलेन गृहाणां भाटकं दातुं तथा भाटकं स्वीकर्तुं सम्बद्धां प्रक्रियां सरलीकर्तुं प्रस्तावोऽपि अनुमोदितः। नूतनव्यवस्थया गृहस्वामिनां तथा भाटकग्राहिणां कृते प्रक्रिया अधिका सुगमा तथा स्पष्टा भवितुं शक्नोति।

गृहभाटकसम्बद्धेषु कार्येषु अनावश्यक-जटिलतायाः न्यूनीकरणं तथा प्रक्रियासरलीकरणं शासनस्य प्रमुखेषु उद्देशेषु अन्यतमम् अस्ति। सभायां परिवहनविभागसम्बद्धाः कतिपयाः प्रस्तावाः अपि मन्त्रिमण्डलेन अनुमोदिताः। एते निर्णयाः प्रदेशस्य परिवहनव्यवस्थां अधिकं सुव्यवस्थितां, प्रभावशालिनीं तथा जनोपयोगिनीं च कर्तुं सहायकाः भविष्यन्ति। मुख्यमन्त्रिणः अध्यक्षतायां सम्पन्नायां मन्त्रिमण्डलसभायां स्वीकृताः एते २३ निर्णयाः प्रदेशस्य विकासस्य दृष्ट्या महत्त्वपूर्णाः सन्ति। विशेषतः मथुरायां एथेनॉलसंयन्त्रस्य स्थापना कृष्याधारित-उद्योगानां विकासं प्रोत्साहयिष्यति। अलीगढनगरे विश्वविद्यालयस्य स्थापना उच्चशिक्षाक्षेत्रे नूतनान् अवसरान् सृजिष्यति। एतेषां परियोजनानां माध्यमेन औद्योगिकनिवेशस्य सम्भावना वर्धिष्यते, स्थानीय-औद्योगिकगतयः तीव्रतराः भविष्यन्ति तथा युवाभ्यः जीविकोपार्जनस्य नूतनाः अवसराः उपलब्धाः भविष्यन्ति।

उत्तरप्रदेशशासनेन स्वीकृतैः एतैः निर्णयैः प्रदेशस्य आर्थिकविकासः अधिकः गतिशीलः भविष्यति, उत्तरप्रदेशम् औद्योगिकविकासस्य, उच्चशिक्षायाः तथा रोजगारसृजनस्य क्षेत्रेषु अग्रणीं कर्तुं एते निर्णयाः महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नुवन्ति इति अपेक्षा अस्ति।

# एचआरटीसी-बसयानेषु 'ग्रीन', 'स्मार्ट', 'सम्मान' पत्राणि पिहितानि; 'हिमबस- प्लसपत्रे' समावेक्ष्यन्ते सर्वाणि पत्राणि







हिमसंस्कृतवार्ता:- शिमला। हिमाचल-पथ-परिवहन-निगमस्य बसयानेषु वर्षैः 'ग्रीन', 'स्मार्ट', 'सम्मान' इति परिचयपत्रैः अपकर्ष- प्रवासाय सञ्जातं महत् परिवर्तनम्। निगमेन ग्रीन, स्मार्ट, सम्मानपत्राणां निर्माणं स्थगितं कृतम्। अधुना अपकर्षप्रवासाय यात्रिकैः 'हिमबस- प्लसपत्रम्' निर्मातव्यं भविष्यति। प्रदेशस्य बसस्थानकेषु पुरातनपत्राणां निर्माण-सुविधा स्थगिता कृता अस्ति। अस्य नूतनपत्रस्य कृते अन्तर्जाल-माध्यमेन आवेदनं करणीयम्। यात्रिकैः एचआरटीसी- जालपुटे पञ्जीकरण-प्रक्रिया सम्पादनीया भविष्यति। निवेदितानि विवरणानि आवश्यक- प्रलेखान् च आरोप्य पञ्चषष्ट्यधिक-त्रिशत- रूप्यकाणां (३६५) शुल्कम् अन्तर्जालेन समर्पणीयम्। प्रक्रियासमाप्तेः कतिपय-दिनानन्तरं सम्बद्ध-स्थानकस्य गणकात् पत्रम् इदं प्राप्तुं शक्ष्यन्ते।

### एक-वर्षं यावत् भविष्यति पत्रस्य वैधता

अस्य नूतनपत्रस्य कार्य-कालावधिः (वैधता) एकवर्षं यावत् स्थास्यति। 'हिम-बस-प्लस-पत्रे' निर्मिते सति सामान्य-यात्रिकेभ्यः एचआरटीसी-बसयानेषु भाटके पञ्च-प्रतिशतं (५%) यावत् अपकर्षः लप्स्यते, यत्रैव वरिष्ठनागरिकेभ्यः पञ्चदश- प्रतिशतं (१५%) अपकर्षः प्रदास्यते। निगमस्य मतेन पुरातनेषु ग्रीन, स्मार्ट, सम्मानपत्रेषु प्रदत्ताः सुविधाः अधुना अस्मिन्नेव 'हिमबस-प्लसपत्रे' समाविष्टाः सन्ति।

### पूर्वतन-व्यवस्थायां लभ्यते स्म २५-तः ३० प्रतिशतं यावत् लाभः

विदितं स्यात् यत् पूर्वतन-व्यवस्थायां ग्रीन-पत्रेण ५० कि.मी. दूरतायै पञ्चविंशति-प्रतिशतं (२५%), सम्मानपत्रेण त्रिंशत्-प्रतिशतं (३०%), स्मार्ट-पत्रेण च सम्पूर्णप्रवासे दश-प्रतिशतं (१०%) अपकर्षः दीयते स्म। साम्प्रतं ते सर्वे अपकर्षाः समाप्ताः सञ्जाताः। पुरा एतानि पत्राणि शत-रूप्यकेषु (१००) एकवर्षाय निर्मीयन्ते स्म, यत्रैव नूतनाय 'हिमबस- प्लसपत्राय' अधुना ३६५ रूप्यकाणां भुक्तिः करणीया अस्ति।

# समृद्धराष्ट्राय संस्कारयुक्ताः नश्यव्यसनमुक्ताः युवाः आवश्यकाः

## कोटद्वारे समपद्यत भव्यभाषण प्रतियोगिता

हिमसंस्कृतवार्ता:- कोटद्वारम्, मानवतायाः प्रतिमूर्तेः स्वर्गीय- सत्यप्रकाश-थपलियाल- महोदयस्य प्रेरणया कण्वनगरी संस्कारशाला संवादात् समाधानम् इत्यस्य अन्तर्गतं "टूरिस्ट- सन्देश- फाउण्डेशनद्वारा" "समृद्धराष्ट्राय संस्कारयुक्ताः नश्यव्यसनमुक्ताः युवाः" इति विषये द्वितीयस्तरीया भाषणप्रतियोगिता मेहरबानसिंहकण्डारी- सरस्वती- विद्यामन्दिर- इण्टर- कॉलेज, अपरकालाबड-कोटद्वारे समायोजिता। अस्यां प्रतियोगितायां राजकीय- बालिका- इण्टरकॉलेज- कोटद्वारम्, राजकीय- इण्टरकॉलेज- कोटद्वारम्, हैप्पीहोम-विद्यालयः, हेरिटेज-विद्यालयः, मेहरबानसिंह कण्डारी- सरस्वती- विद्यामन्दिर- इण्टर- कॉलेजः, राजकीय- बालिका- इण्टरकॉलेज- लालपानी इत्येतेषां विद्यालयानां छात्राः छात्राश्च उत्साहेन सहभागीभूत्वा नश्यव्यसनमुक्तसमाजस्य निर्माणे संस्कारस्य महत्त्वं प्रभावशालिरूपेण प्रतिपादितवन्तः। कार्यक्रमस्य सफलसञ्चालने कार्यप्रभारिणः डॉ. रमाकान्त कुकरेती, वन्दना भारद्वाजः, रेणु गौडः, परीक्षा भण्डारी, सन्तोषनेगी,



विद्यालयस्य प्रधानाचार्यः चन्दनसिंह नकोटिः प्रमुखभूमिकायाः निर्वहनं कृतवन्तः। निर्णायकमण्डलेन विषयवस्तु, शुद्धोच्चारणम्, प्रभावः, समयपालनं, प्रस्तुतेः निरन्तरता इत्येतेषां मानदण्डानाम् आधारेण निष्पक्षं मूल्यांकनम् अकरोत्। प्रतियोगिताफले रुद्रप्रतापसिंहः प्रथमस्थानं, नमरा द्वितीयस्थानं, अर्चना तृतीयस्थानं च प्राप्तवती। सार्थकः, जिया सान्त्वनापुरस्काराभ्यां च सम्मानितौ। समापनावसरे आयोजकैः सर्वेषां प्रतिभागिनां उज्ज्वलभविष्यस्य शुभकामना व्यक्तीकृता, नश्यव्यसनविरुद्धं जनजागरणस्य च सशक्तः सन्देशः प्रदत्तः।

# 'गृहे गृहे संस्कृतम्' योजनान्तर्गत दसदिवसीय आवासीय प्रशिक्षण का शुभारम्भः




हिमसंस्कृतवार्ता:- लखनऊ, उत्तर प्रदेश उत्तरप्रदेशसंस्कृतसंस्थानं, लखनऊ द्वारा संचालितं 'गृहे गृहे संस्कृतम्' योजनायाः अन्तर्गत दसदिवसीयं आवासीयं सरल- संस्कृत- भाषा-शिक्षणप्रशिक्षणस्य शुभारम्भः मङ्गलवासरे अभवत्। १५ सितम्बरतः २४ सितम्बर २०२६ पर्यन्तं प्रवर्तमानस्य अस्य प्रशिक्षणस्य मुख्योद्देश्यं संस्कृतं पुस्तकेभ्यः कक्षाभ्यश्च बहिः नीत्वा गृहपरिवारे दैनिकव्यवहारे च प्रयोगयोग्यभाषारूपेण प्रतिष्ठापयितुम् अस्ति। उद्घाटनसमारोहस्य शुभारम्भः मङ्गलाचरणेन अभवत्। ततः मञ्चोपवेशनं, सञ्चालनं, स्वागतभाषणं, प्रास्ताविकं च सम्पन्नम्। अस्मिन् अवसरे प्रशिक्षणस्य आवश्यकता, उद्देश्यम् आगामीदशदिनेषु आयोज्यमानानां विविधगतिविधीनां च विषये प्रतिभागिभ्यः जानकारी प्रदत्ता। संस्थानस्य वरिष्ठप्रशासनिकाधिकारी दिनेशकुमारमिश्रः प्रशिक्षणार्थिनः सम्बोधयन् अवदत् यत् संस्कृतस्य व्यापकप्रसाराय तस्य नियमिताभ्यासः दैनिकजीवने प्रयोगश्च आवश्यकः। सः प्रशिक्षणार्थिभ्यः अनुशासनेन निरन्तराभ्यासेन च प्रशिक्षणं प्राप्तुं आह्वानं कृतवान्। 'गृहे गृहे संस्कृतम्' योजनायाः माध्यमेन संस्कृतं गृहं गृहं प्रति नेतुं प्रयासः क्रियते, इति सः प्रतिपादितवान्।

प्रशासनिकाधिकारी जगदानन्दझा संस्कृतस्य प्रति जनसामान्यस्य रुचिवर्धनस्य, भाषायाः सामान्यजीवनेन सह संयोजनस्य आवश्यकतायाः विषये प्रकाशं व्याजहार। सः प्रशिक्षणार्थिनाम् उत्साहवर्धनं कुर्वन् प्रशिक्षणस्य सफलतायै शुभकामनाः अयच्छत्। दशदिवसीयस्य आवासीयप्रशिक्षणस्य अन्तर्गतं प्रतिभागिभ्यः दैनिकजीवने प्रयुज्यमानानां सरलसंस्कृतशब्दानां, वाक्यानां संवादानां च व्यावहारिकाभ्यासः कारयिष्यते। आवासीयस्वरूपस्य कारणेन प्रशिक्षणार्थिनां कृते संस्कृतमयं वातावरणं निर्मास्यते, येन ते संस्कृतं श्रुत्वा, अवगत्य, वदित्वा च नियमिताभ्यासं कर्तुं शक्नुवन्ति।

प्रशिक्षणस्य प्रमुखोद्देश्यं प्रतिभागिनः सामान्यपरिस्थितिषु सरलसहजसंस्कृतसम्भाषणे आत्मविश्वासयुक्तान् कर्तुम् अस्ति। संस्थानस्य मतानुसारं संस्कृतं जनजनस्य भाषां कर्तुं तस्य सरलः, सहजः, व्यवहारोपयोगी च स्वरूपेण प्रचारः आवश्यकः। अस्मिन् आवासीयप्रशिक्षणे शिक्षकः धीरजमैथाणी, शिक्षकः अनिलगौतमः, प्रशिक्षिका पूनमसिंहः, आस्थाशुक्ला प्रशिक्षणं प्रदास्यन्ति।

# रुद्रप्रयागजनपदस्य भव्यसंस्कृतमासमहोत्सवः भारतीकन्नोजिया द्वारा सम्पाद्यते

**सितम्बर 18 दिनांके उत्तराखण्ड-संस्कृत- संस्थानेन समायोज्यते एकदिवसीया संस्कृतसंगोष्ठी।**



**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, रुद्रप्रयाग।** उत्तराखण्ड- संस्कृतसंस्थानं हरिद्वारं, राजकीय- महाविद्यालयः जखोली (रुद्रप्रयागः) इत्येतयोः संयुक्ततत्त्वावधानेन संस्कृत-मासमहोत्सवस्य उपलक्ष्ये १८ सितम्बर २०२६ (शुक्रवासरे) प्रातः ११:०० वादने अन्तर्जालीय-माध्यमेन एकदिवसीया जनपदस्तरीया संस्कृतसंगोष्ठी समायोज्यते। कार्यक्रमस्य अध्यक्षतां महाविद्यालयस्य प्राचार्या डॉ. माधुरीमहोदयाद्वारा सम्पद्यते। संगोष्ठ्याः मुख्यवक्त्री प्रो. कमला भारद्वाजः, सेवानिवृत्ता संकायाध्यक्षा, श्रीलालबहादुरशास्त्री- केन्द्रीय-संस्कृत- विश्वविद्यालय- नवदेहली भविष्यति। विशिष्टातिथिरूपेण डॉ. प्रीतिः, प्राध्यापिका, हेमवतीनन्दनबहुगुणा- गढ़वाल-विश्वविद्यालयात् सहभागिता करिष्यति। कार्यक्रमस्य सहसंयोजिका कुमारी सुमनः तथा जनपदसंयोजिका डा. भारती इत्येताभ्यां सञ्चालनं विधास्यते। आयोजकैः जनपदस्य संस्कृतप्रेमिणः, अध्यापकाः, शोधार्थिनः, छात्राः, संस्कृतानुरागिणः सर्वेभ्यः विनम्रं निमन्त्रणं प्रदत्तम् यत् ते अन्तर्जालीय- माध्यमेन उपस्थाय कार्यक्रमस्य शोभां वर्धयिष्यन्ति।




# एशियाईक्रीडास्पर्धायै भारतीयक्रीडकानां सज्जतायै ७०८ कोटिरूप्यकाणि व्ययः अभवत्



**नवदिल्ली /भागलपुर १५ सितंबर २०२६**
**हिमसंस्कृतवार्ताः - डॉ विमलेश झा**

अस्मिन् वर्षे एशियाईक्रीडास्पर्धायै भारतीयक्रीडकानां सज्जतायै केन्द्रसर्वकारेण ७०८ कोटिरूप्यकाणि व्ययितानि। अस्मिन् व्यये प्रशिक्षणम्, उपकरणानि, प्रशिक्षकाणां वेतनम् इत्यादीनि सम्मिलितानि सन्ति।
एशियाईक्रीडास्पर्धाः १९ सितम्बरतः जापानदेशस्य आइचीनगोयानगरे प्रारप्स्यन्ते। भारतदेशेन ३६ क्रीडाविधासु ५०१ क्रीडकाः तथा २६५ सहाय्यक-कर्मचारिणः प्रेषिताः सन्ति। भारतीयदले २६७ पुरुषक्रीडकाः तथा २३४ महिलाक्रीडकाः सन्ति। ३१० भारतीयक्रीडकाः प्रथमवारम् एतस्यां एशियाईक्रीडास्पर्धायां भागं गृह्णन्ति।
२०२२ तमे वर्षे हाङ्ग्झोउनगरे आयोजितायाम् एशियाईक्रीडास्पर्धायां भारतं १०६ पदकानि विजितवान्। तेषु २८ स्वर्णपदकानि, ३८ रजतपदकानि तथा ४० कांस्यपदकानि आसन्। एतत् भारतस्य एशियाईक्रीडास्पर्धासु श्रेष्ठतमेषु प्रदर्शनेषु अन्यतमम् आसीत्।
लक्ष्यओलम्पिकपोडियमयोजना (टीओपीएस) २०१४ तमे वर्षे प्रारब्धा। अस्याः योजनायाः मुख्योद्देश्यम् ओलम्पिक्, एशियाईक्रीडास्पर्धा, राष्ट्रमण्डलक्रीडास्पर्धा इत्यादिषु बहुक्रीडात्मकासु अन्तर्राष्ट्रीयक्रीडास्पर्धासु भारतीयक्रीडकानां आवश्यकसहायतां प्रदातुम् अस्ति।सज्जतायै व्ययितेषु ७०८ कोटिरूप्यकेषु प्रायः ९८ कोटिरूप्यकाणि टीओपीएस-योजनायाः अन्तर्गतं व्ययः अभवत्। अन्ताराष्ट्रियप्रतियोगितासु भागग्रहणस्य अनुभवप्रदानाय २५१.४ कोटिरूप्यकाणि, तथा गृहसम्बद्धप्रशिक्षणाय ११८.३ कोटिरूप्यकाणि व्ययः अभवत्। लक्ष्योन्मुख-एशियाई-क्रीडासमूहस्य नव समन्वयसभाः अस्मिन् वर्षे जनवरीमासतः इदानीं यावत् आयोजिताः। एतासु सभासु क्रीडकानां प्रशिक्षणम्, आवश्यकसुविधाः तथा तेषां कृते उत्तमवातावरणस्य निर्माणम् इत्यादीनां विषयाणां समीक्षा कृता। टीओपीएसयोजनया भारतीयदले शारीरिकचिकित्सकाः, मानसिकस्वास्थ्यविशेषज्ञाः च पर्याप्तसंख्यायां नियुक्ताः सन्ति। प्रत्येकं क्रीडादले महिलासहायककर्मचारिणः अपि सन्ति। सहायककर्मचारिणां मध्ये प्रायः एकतृतीयांशः कर्मचारिणः क्रीडाविज्ञानक्षेत्रैः सम्बद्धाः सन्ति।
अनेन प्रकारेण भारतीयक्रीडकानां शारीरिकमानसिकस्वास्थ्यं, प्रशिक्षणव्यवस्था च सुदृढीकृता अस्ति। सर्वकारस्य प्रयासः अस्ति यत् भारतीयक्रीडकाः एशियाईक्रीडास्पर्धायां उत्कृष्टं प्रदर्शनं कृत्वा देशस्य गौरवं वर्धयेयुः।



# वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। येलोस्टोन-राष्ट्रोद्याने उष्णकुण्डेभ्यः द्विशताधिकाः टोपिकाः निष्कासिताः, बहुः अवकरः च लब्धः।
**काव्या-** उष्णजले एतादृश्यः टोपिकाः पतिताः इति आश्चर्यम्! नासिकानगरे गणेश-महोत्सवे एकं सुवर्णमोदकं विरचितम्। तस्य एक- किलो-परिमितस्य मूल्यं सप्तविंशति-सहस्र-रूप्यकाणि निर्धारितम्।
**नन्दिनी-** सत्यम्, एतादृशं बहुमूल्यं मिष्टान्नं मया कदापि न दृष्टम्! अपि च, बुखारेस्ट-नगरे पञ्च-किलोमीटर-दीर्घा भोजन-पीठिका सज्जीकृता, सा च विश्व-कीर्तिमान-पुस्तके पञ्जीकृता।
**काव्या-** एतावती दीर्घा पीठिका जनैः दृष्टा, बालकानां साहाय्यार्थं च सा निर्मिता इति उत्तमम्। 'टिली नोर्वुड्' नाम्नी एका कृत्रिम- प्रज्ञा- नटी निर्मिता, तया चलच्चित्र-पुरस्कारेषु नूतनः वर्गः प्रार्थितः।
**नन्दिनी-** अहो, यन्त्र-निर्मिता नटी पुरस्कारम् इच्छति इति मया ज्ञातम्, एतत् अतीव विचित्रम्! अस्तु, पुनर्मेलिष्यामः। धन्यवादाः!



# बिहारराज्यस्य मन्त्रिमण्डलेन सप्तदशप्रस्तावाः अनुमोदिताः

पटना /भागलपुर १५/०९/२०२६
हिमसंस्कृतवार्ताः- डॉ विमलेश झा

बिहारस्य मुख्यमन्त्रिणः श्रीसम्राट् चौधरी महोदयस्य अध्यक्षतायां सम्पन्नायां राज्यमन्त्रिमण्डलस्य सभायां विकास जीविकोपार्जनाभ्यां सम्बद्धाः अनेके महत्त्वपूर्णाः निर्णयाः स्वीकृताः। सभायां विभिन्नविभागैः सम्बद्धाः १७ प्रस्तावाः मन्त्रिमण्डलेन अनुमोदिताः। एतेषु मखान्नविकासः, उद्यानकृषिः, चिकित्सामहाविद्यालयाः, गयाजीनगरस्य विष्णुपदमन्दिरस्य विकासः, वायुमार्गसम्पर्कः, जलप्लावनसुरक्षा तथा आधारभूतसुविधानां विकासः प्रमुखाः सन्ति।

मन्त्रिमण्डलेन वित्तीयवर्षे २०२६-२७ केन्द्रीयमखान्नविकासयोजनायै प्रायः ८९.८० कोटिरूप्यकाणां धनराशेः स्वीकृतिः प्रदत्ता। अस्याः योजनायाः मुख्योद्देश्यं मखान्नस्य सम्पूर्णमूल्यशृङ्खलायाः सुदृढीकरणम् अस्ति।

अस्याः योजनायाः अन्तर्गतं मखान्नस्य उत्पादनं, बीजव्यवस्था, कृषकप्रशिक्षणं, प्रसंस्करणं, ब्राण्डनिर्माणं तथा विपणनव्यवस्था च सुदृढा करिष्यते। मखान्नस्य निर्याताय प्रमाणीकरणव्यवस्थायै च विशेषं प्रोत्साहनं प्रदास्यते। एतेन कृषकाणां, व्यवसायिनां तथा कृषक-उत्पादकसङ्घटनानाम् आयवृद्धौ सहायता भविष्यति। राज्यस्य पञ्चसु सर्वकारीय-चिकित्सामहाविद्यालयेषु सहायकप्राध्यापकस्य ३६६ रिक्तपदेषु संविदाधारेण नियुक्तिः करिष्यते। एतेषु बेतिया, पूर्णिया, मधेपुरा, छपरा तथा समस्तीपुरस्थिताः चिकित्सामहाविद्यालयाः सम्मिलिताः सन्ति। नियमित-नियुक्तिः यावत् न भवति, तावत् एतेषु पदेषु संविदाधारेण नियुक्तिः भविष्यति। अस्य निर्णयस्य फलतः चिकित्सामहाविद्यालयेषु अध्यापकानां न्यूनता न्यूनी भविष्यति तथा विद्यार्थिनां चिकित्साशिक्षायै उत्तमाः सुविधाः प्राप्स्यन्ति। गयाजीनगरस्य प्रसिद्धस्य विष्णुपदमन्दिरक्षेत्रस्य विकासाय २५२० कोटिरूप्यकाणां प्रशासनिकस्वीकृतिः प्रदत्ता। वाराणस्याः काशीविश्वनाथधामस्य विकासस्य अनुरूपं विष्णुपदक्षेत्रस्य समग्रविकासः कर्तुं योजना अस्ति। अस्य विकासपरियोजनायाः अन्तर्गतं मन्दिरपरिसरस्य सौन्दर्यीकरणं, घाटानां विकासः, बहुस्तरीयवाहनस्थापनस्थलस्य निर्माणम्, उन्नतमार्गस्य निर्माणम्, यात्रिनिवासः, भोजनालयः तथा पदचारीसेतोः निर्माणं च प्रस्तावितम् अस्ति। एतेषां सुविधानां विकासेन देशस्य विभिन्नेभ्यः भागेभ्यः आगच्छतां तीर्थयात्रिकाणां पर्यटकानां च कृते अधिकाः सुविधाः उपलब्धाः भविष्यन्ति। गयाजीक्षेत्रस्य धार्मिकपर्यटनस्य विकासे अपि अस्य परियोजनायाः महत्त्वपूर्णं योगदानं भविष्यति। मन्त्रिमण्डलेन सोनफल्गुनदीसंयोजन-परियोजनायै ९९६ कोटिरूप्यकाणां स्वीकृतिः अपि प्रदत्ता। अस्याः परियोजनायाः माध्यमेन जलसंसाधनानां समुचितोपयोगः, कृषिकार्यस्य प्रोत्साहनं तथा जलसम्बद्धानां समस्याणां समाधानं च साधयितुं प्रयत्नः भविष्यति।विष्णुपदक्षेत्रस्य विकासपरियोजनां सोनफल्गुनदी-संयोजनपरियोजनां च सम्मिल्य उभयोः परियोजनयोः कृते प्रायः ३५१६ कोटिरूप्यकाणां व्ययः भविष्यति। ईष्टिकानिर्माणव्यवसायिभ्यः आर्थिकसहायतां प्रदातुं मन्त्रिमण्डलेन एकमुष्टसमाधानयोजनायाः अनुमोदनं कृतम्। एषा योजना त्रिमासपर्यन्तं प्रभाविता भविष्यति।अस्याः योजनायाः अन्तर्गतं ईंट-भट्ट-व्यवसायिभ्यः वित्तीयवर्षं २०२४-२५ पर्यन्तस्य अदेयराशेः केवलं मूलधनम् आदानस्य अवसरः प्रदास्यते। तत्र राशेः उपरि देयस्य वृद्धि धनस्य परित्यागस्य व्यवस्था भविष्यति। अनेन निर्णयेन ईष्टिकानिर्माणव्यवसायिभ्यः आर्थिकरूपेण लाभः प्राप्स्यति तथा शासनाय अपि अदेयराजस्वस्य शीघ्रं प्राप्तेः अवसरः भविष्यति। बिहारमन्त्रिमण्डलेन स्वीकृतैः १७ प्रस्तावैः कृषि, स्वास्थ्य, धार्मिकपर्यटन, जलसंसाधन, उद्योग तथा जीविकोपार्जनक्षेत्रेषु विकासस्य नूतनाः सम्भावनाः उद्घाटिताः भविष्यन्ति। मखान्नविकासयोजनया कृषकाणां आयवृद्धिः, चिकित्सामहाविद्यालयेषु नियुक्तिभिः शिक्षणव्यवस्थायाः सुदृढीकरणं तथा विष्णुपदक्षेत्रस्य विकासेन धार्मिकपर्यटनस्य विस्तारः अपेक्षितः अस्ति।राज्यशासनेन स्वीकृताः एते निर्णयाः बिहारस्य समग्रविकासं गतिशीलं कर्तुं तथा नागरिकेभ्यः नूतनाः आर्थिकसामाजिकसुविधाः प्रदातुं महत्त्वपूर्णाः चरणाः सन्ति।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# समाजस्थिति-विषयकं चिन्तनम्

मम सामान्यदृष्ट्या बहुवर्षेभ्यः प्राक् अपि, इमां पवित्र-धर्मपरम्पराम् आधारीकृत्य प्रचलन् अस्माकं समाजः, अद्य दिग्भ्रान्तपरिस्थितौ जर्जरितः, एवं विप्लुतप्रायः दृश्यते। अद्य सर्वे जनाः अशान्ताः सन्ति। एवं भवने आभ्यन्तराणि कारणानि अपि भवन्ति। तानि कारणानि अथवा ताः अपशक्तीः अन्विष्य दूरीक्रियेत चेन्मात्रं समाजः पुनः पूर्ववत् स्वस्वरूपं प्राप्तुं शक्नुयात्। कस्यचित् दृष्टौ पतिताः समस्याः, तादृशानि कारणानि समाजे एव अर्थात् सभायाम् एव व्यक्तव्यानि भवेयुः, उचितमपि एतत्। एतेन समाधानसूत्रमपि प्राप्यते। यदि गृहे-गृहे, मार्गे चत्वरे च समाजस्य विषयं नीत्वा कर्णाकर्णितया जपः क्रियते, तर्हि तत्र मूर्खतायाः अतिरिक्तम् अन्यत् किमपि नास्ति। एतेन समाधानं न प्राप्यते, अपितु समस्या इतोऽपि वर्धते।

कलहो वा मनोमालिन्यमेव वा हि भवतु नाम समाजस्य आमसभायामेव समुचितरूपेण तद् व्यक्तव्यम्। कापट्यं मनसि निधाय मौनमवलम्बनं मास्तु, अपितु स्पष्टरूपेण यथार्थवचनं व्यक्तीकार्यम्। मनसि पापस्य धारणं नोचितम्। एतेन समाजः अधिकं पीड्यते, संशोधनं च न कदापि भवितुं शक्नोति। कस्यचित् पक्षं गृहीत्वा न, अपि तु निरपेक्षरूपेण चिन्तने आगतानि तानि कारणानि समाजस्य पुरतः उपस्थापनीयानि। वदता केनचन दोषोऽपि भवितुमर्हते इति तु सामान्यमेव, यतोहि सर्वं जानाति इत्येतादृशः सर्वज्ञो जगति, न कोऽपि मनुष्यो विद्यते। जगति पूर्णनिर्दोषो मनुष्यो न लभ्यते, ऋषि-महात्मनां अपि दोषः, तस्य प्रायश्चित्तं च भवति स्म इति इतिहासपुस्तकेषु प्राप्यते। सर्वज्ञः कर्मफलदाता च एकमात्रम् ईश्वर एव अस्ति, इदमेव अन्तिमं सत्यम्। मनुष्यस्तु निमित्तमात्रमेव ।

कस्यापि अत्र शत्रुः वा, मित्रं वा नास्ति कोऽपि, सर्वे एकाकिन एव सन्ति, स्वेन कृतस्य शुभाशुभकर्मणः फलं भुञ्जते। तथापि प्राकृतिक-नियमानुसारं व्यवहारक्षेत्रे समाजव्यवस्थायाः आवश्यकता भवति। मनुष्यस्य एव न, पशूनामपि सम्यक् समाजव्यवस्था दृश्यते। सर्वे मिलित्वा परस्परसहयोगभावेन समाजे सुखशान्तिपूर्वकं स्थातुं शक्यते चेन्मात्रं मनुष्यजीवनं सार्थकं भवति। यतः समाजस्य आवश्यकता प्रत्येकं व्यक्तेः आमरणं तिष्ठति, यश्च समाजः प्रत्येकं जनस्य एको जीवनाधारः वर्तते इति

# कृषकेभ्यः सर्वकारीय-योजनानां लाभ-प्रदानम् अस्माकं प्राथमिकता; कृषि-राजस्व-सहकारिता-विभागाः मिलित्वा करिष्यन्ति कार्यम्



## कृषकाणां सस्यस्य उचित-मूल्य-प्राप्तये न्यूनतम-समर्थन-मूल्यस्य (MSP) व्यवस्था भविष्यति प्रभाविणी ५३ लक्षाधिक-कृषकाणां पञ्जीकरणं (Farmer Registry) सम्पन्नम्, अवशिष्टानां प्रक्रिया शीघ्रा भविष्यति : विजयकुमारसिन्हा

**१५ सितम्बर २०२६ | पाटलिपुत्रम् (पटना)।**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

कृषकेभ्यः सर्वकारीय-योजनानां सेवानां च लाभम् अधिक-प्रभावि-पारदर्शि-सुलभ-रीत्या उपलभ्यं कर्तुम् अद्य कृषि-राजस्व-भूमि-सुधार-सहकारिता-विभागानां माननीयैः मन्त्रिभिः उच्चाधिकारिभिः च सह संयुक्ता समन्वय-गोष्ठी आयोजिता। उपवेशने कृषक-सम्बद्धानां विविधानां महत्त्वपूर्णानां विषयाणां विस्तृता समीक्षा जाता तथा च त्रिभिः विभागैः परस्पर-समन्वयेन कार्य-करणाय बलं दत्तम्।

माननीयः कृषिमन्त्री श्रीविजयकुमारसिन्हा, राजस्व-भूमि-सुधार-मन्त्री श्रीदिलीपकुमारजायसवालः तथा सहकारिता-मन्त्री श्रीरामकृपालयादवः च कृषक-कल्याणाय सञ्चालितायाः 'एग्रीस्टैक' (AgriStack) योजनायाः अन्तर्गतं कृषक-पञ्जीकरणम् (Farmer Registry), कृषक-परिचय-पत्रस्य (Farmer ID) माध्यमेन न्यूनतम-समर्थन-मूल्य-आधारित-क्रयण-व्यवस्थां, कृषक-क्रेडिट-कार्ड (KCC) योजनां तथा च प्रधानमन्त्री-फसल-बीमा-योजनाम् अधिकृत्य प्रगतेः समीक्षणम् अकुरुताम्।

कृषिमन्त्री श्रीविजयकुमारसिन्हा अवदत् यत् बिहारस्य अर्थव्यवस्थायाः ग्रामीण-विकासस्य च कृषकाः एव मेरूदण्ड-स्वरूपाः सन्ति। कृषकाणाम् आयवर्धनं, तेषां सस्य-रक्षणं तथा हितानां संरक्षणं च सर्वकारस्य शीर्ष-प्राथमिकतासु वर्तते। त्रयाणां विभागानां समन्वित-प्रयासेन कृषक-केन्द्रिता व्यवस्था सुदृढा भविष्यति।

### ५३ लक्षाधिकानां कृषकाणां पञ्जीकरणं सञ्चितम्

बिहारे कृषक-पञ्जीकरणस्य कार्यं तीव्रगत्या प्रचलति, अद्यावधि प्रायः ५३ लक्षाधिकानां कृषकाणां डिजिटल-पञ्जीकरणं सम्पन्नम्। अनेन कृषकाणां परिचयः, तेषां भूमेः विवरणं कृषि-सम्बद्धाः सूचनाः च व्यवस्थित-डिजिटल-माध्यमेन योजिताः भविष्यन्ति। कृषक-परिचय-पत्रेण (Farmer ID) योजनानां लक्ष्य-निर्धारणे, बीजानाम्, उर्वरकाणां, कृषि-यन्त्राणां, फसल-बीमायाः, आपदा-सहायतायाः तथा च विविधानाम् अनुदानानां समये वितरणे महती सुविधा भविष्यति। मन्त्री न्यवेदयत् यत् तान्त्रिक-प्रौद्योगिकीं कृषकाणां शक्तिः इति रूपेण परिणमयितुम् एषा व्यवस्था दृढीक्रियते।

राजस्व-भूमि-सुधार-मन्त्री श्रीदिलीपकुमारजायसवालः अकथयत् यत् कृषक-पञ्जीकरणस्य सुगम-सञ्चालनाय राजस्व-विभागीय-अधिकारिणः निर्दिष्टाः सन्ति, येन जनपद-अञ्चल-स्तरेषु कृषि-विभागेन सह समन्वयः स्यात्। सः सूचितवान् यत् यत्र भूमेः दाखिल-खारिज-प्रक्रिया (Mutation) भविष्यति, तत्र तत्क्षणमेव कृषकस्य पञ्जीकरणं करिष्यते; पूर्व-पञ्जीकृतानां कृषकाणां नवीन-भूमि-विवरणम् अपि तेषां विद्यमाने एव परिचय-पत्रे योजयिष्यते।

### न्यूनतम-समर्थन-मूल्य-व्यवस्थायाः (MSP) सुदृढीकरणे बलम्

सहकारिता-मन्त्री श्रीरामकृपालयादवः अवदत् यत् कृषकाणां सस्यानाम् उचित-मूल्यं प्रदातुं न्यूनतम-समर्थन-मूल्ये क्रयण-व्यवस्था अधिका पारदर्शिनी विधीयते। कृषक-पञ्जीकरणेन क्रयण-प्रक्रियायां धन-भुगतान-प्रक्रियायां च वास्तविक-कृषकाणां प्रत्यक्ष-सम्पर्कः भविष्यति। पैक्स (PACS) तथा सहकारी-संस्थानां माध्यमेन सस्य-सङ्ग्रहणं, विपणन-व्यवस्थां च सबलं विधातुं सहकारिता-विभागः कार्यं कुर्वन् अस्ति।

तेन उक्तं यत् सहकारी-व्यवस्थायाः माध्यमेन कृषकेभ्यः सांस्थानिक-ऋणस्य विपणनस्य च सुविधा प्रदास्यते, येन केसीसी (KCC) तथा प्रधानमन्त्री-फसल-बीमा-योजनायाः लाभः, क्षतिपूर्ति-वितरणं च सरलतया पारदर्शि-रीत्या च सम्भविष्यति।

# अद्यतनविश्वस्य संजीवनी- योगः

सप्तचक्राणां रहस्यं सन्तुलनञ्च

योगशास्त्रे कुण्डलिनी-योगसाधनायां चास्माकं शरीरे सप्त- मुख्योर्जा-चक्राणि उक्तानि सन्ति। एतानि चक्राणि मेरुदण्डस्याधोभागादारभ्य मस्तिष्कस्य शीर्षभागं यावत्स्थितानि भवन्ति। एतेषां चक्राणां सन्तुलनेन शरीरं, मनः, चेतना च निरोगतां प्राप्नुवन्ति।

१. मूलाधारचक्रम् (रक्तवर्णम्)- एतत् मेरुदण्डस्याधोभागे स्थितं भवति। एतत्सुरक्षायाः स्थैर्यस्य च प्रतीकमस्ति। असन्तुलने भयस्य सुरक्षायाः च अनुभवः भवति । एतस्य सन्तुलनाय 'लं' बीजमन्त्रस्य जपः, वृक्षासनं ताडासनञ्च कुर्यात्।

२. स्वाधिष्ठानचक्रम् (नारङ्गवर्णम्)- नाभेरधः स्थितमेतच्चक्रं रचनात्मकतां भावनाश्च नियन्त्रयति। 'वं' बीजमन्त्रस्य जपेन कलासाधनाभिश्चैतत् सन्तुलितं भवति।

३. मणिपूरचक्रम् (पीतवर्णम्)- नाभिद्वारे स्थितमेतच्चक्रमान्तरिकशक्तिं पाचनक्रियाञ्च सञ्चालयति। असन्तुलने आत्मविश्वासस्य लोपो भवति। 'रं' बीजमन्त्रस्य जपेन सूर्यस्नानेन चैतत् नियन्त्रितं भवति।

४. अनाहतचक्रम् (हरितवर्णम्)- हृदयक्षेत्रे स्थितमेतच्चक्रं प्रेम-करुणा-क्षमाणां केन्द्रमस्ति। असन्तुलने एकाकिता सम्बन्धेषु कटुता चागच्छति। प्राणायामेन 'यं' बीजमन्त्रस्य जपेन चास्य जागरणं भवति ।

५. विशुद्धचक्रम् (लघु-नीलवर्णम्)- कण्ठे स्थितमेतच्चक्रं संवादस्य सत्यवाण्याश्च प्रतीकमस्ति। 'हं' बीजमन्त्रस्य जपेन मौनव्रतेन चैतद्विशुद्धं भवति।

६. आज्ञाचक्रम् (गहन-नीलवर्णम्)- भ्रूमध्ये स्थितमेतच्चक्रमान्तर्ज्ञानं मानसिकस्पष्टताञ्च ददाति। ध्यानेन 'ॐ' वा 'क्ष' मन्त्रेण चैतज्जाग्रतं भवति।

७. सहस्रारचक्रम् (बैगनी / श्वेतवर्णम्)- मस्तकस्य शीर्षभागे स्थितमेतच्चक्रमाध्यात्मिकचेतनां पूर्णशान्तिञ्च ददाति। सात्त्विकाहारेण निःशब्दध्यानेन चास्य प्राप्तिर्भवति।

**— प्रांजल (कानपुरनगरम्, उत्तर प्रदेशः)**

## "संस्कृतकथामञ्जरी" {१८} ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।। "ब्राह्मणीशापमोचनं नाम द्वादशोपाख्यानम्" (३)

ततः सा स्त्री समागत्य राज्ञः पादयोः पतित्वा भणति स्म- भो राजन्! तव प्रसादान्मम शापवसानमभूत्। महतो दुःखसागरात् त्वयाऽहम् उद्धृता। राज्ञा भणितं- काऽसि त्वम्? तयोक्तम्- अस्मिन्नेव नगरे महाधनसम्पन्नः कश्चित् ब्राह्मणः आसीत्, तस्य भार्याऽहम्, व्यभिचारिणीभूताया मम तस्योपरि कियत्यपि प्रीतिर्नासीत्, परन्तु तस्य ममोपरि महाननुरागः अस्यात्। रूपादिगर्वयुताऽहं तेन सम्भोगार्थमाहूताऽपि नागमम्। अतो यावज्जीवं कामसन्तप्तः स मम पतिः देहावसानसमये मामशपत्- किमिति रे दुराचरि! यथा यावज्जीवं त्वया मम सुदुःसहो मनःसन्तापः उत्पादितः तथैव वेणुवनवासी कश्चिदतिभयङ्कररूपो राक्षसो रात्रौ त्वामनिच्छन्ती सुरतार्थं प्रतिदिनं ताडयतु इति। एवमभिशप्तया मया पुनः शापावसानं याचितं- किमिति भो नाथ! शापस्यावसानं देहि इति। तेनोक्तं- यदा परोपकारी महाधैर्यसम्पन्नः पुरुषः कश्चित् समागत्यं तं राक्षसं हनिष्यति, तदा त्वं तत्पादौ नत्वा शापमुक्ता भविष्यसि। मदीयमिदं धनं तस्मै देहि इति। मामेवमुक्त्वा स प्राणान् अत्यजत्। तदवधि अहं राक्षसहस्तेन प्रतिरात्रि निगृहीताऽभवम्; अधुना तव प्रसादात् मम शापावसानं जातं, तदिमं गृहाण इत्युक्त्वा सा धनपूर्णघटमेकं दत्तवती। राजा तु तं धनपूर्णघटं समादरात् स्वीकृत्य, पुरन्दरवणिजे दत्त्वा तेन सहोज्जयिनीमगात्; ब्राह्मणभार्य्याऽपि स्वभवनमयासीत्। पुत्तलिका इमां कथां कथयित्वा भोजमब्रवीत्- भो राजन्! त्वय्येवं धैर्य्यमौदार्य्यं विद्यते चेत्, तर्ह्यस्मिन् सिंहासने समुपविश। राजा तूष्णीमासीत्।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**